# Shri Bala Stavaraja 3

# श्रीबालास्तवराजः ३

## Document Information

Text title : Shri Bala Stavaraja 3

File name : bAlAstavarAjaH3.itx

Category : devii, dashamahAvidyA, devI, stavarAja

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# श्रीबालास्तवराजः ३

ॐ अस्य श्रीबालास्तवराजस्तोत्रस्य श्रीमृत्युञ्जय ऋषिः ।
ककुप्छन्दः । श्रीबाला देवता । क्लीं बीजम् । सौः शक्तिः । ऐं कीलकम् ।
भोगमोक्षार्थे जपे विनियोगः ।

त्रिबीजभाजायुक्तेन कराङ्गौ न्यासमाचरेत् ।
ध्यानं ततः शृणुष्वाशु सर्वैश्वर्यप्रदायकम् ॥ १॥

अक्षपुस्तधरां रक्तां वराभयकराम्बुजाम् ।
चन्द्रमुण्डां त्रिनेत्रां च ध्यायेद्बालां फलप्रदाम् ॥ २॥

ऐं त्रैलोक्यविजयायै हुँ फट् । क्लीं त्रिगुणरहितायै हुँ फट् ।
सौः सर्वैश्वर्यदायिन्यै हुँ फट् ।
नातः परतरा सिद्धिर्नातः परतरा गतिः ।
नातः परतरो मन्त्रस्सत्यं सत्यं वदाम्यहम् ॥ ३॥

रक्तां रक्तच्छदां तीक्ष्णां रक्तपां रक्तवाससीम् ।
स्वरूपां रत्नभूषां च ललज्जिह्वां परां भजे ॥ ४॥

त्रैलोक्यजननीं सिद्धां त्रिकोणस्थां त्रिलोचनाम् ।
त्रिवर्गफलदां शान्तां वन्दे बीजत्रयात्मिकाम् ॥ ५॥

श्रीबालां वारुणीप्रीतां बालार्ककोटिद्योतिनीम् ।
वरदां बुद्धिदां श्रेष्ठां वामाचारप्रियां भजे ॥ ५॥

चतुर्भुजां चारुनेत्रां चन्द्रमौलिं कपालिनीम् ।
चतुःषष्टियोगिनीशां वीरवन्द्यां भजाम्यहम् ॥ ६॥

कौलिकां कलतत्त्वस्थां कौलावाराङ्कवाहनाम् ।
कौसुम्भवर्णां कौमारीं कवर्मधारिणीं भजे ॥ ७॥

द्वादशस्वररूपायै नमस्तेऽस्तु नमो नमः ।

नमो नमस्ते बालायै कारुण्यायै नमो नमः ॥ ८॥

विद्याविद्याद्यविद्यायै नमस्तेऽस्तु नमो नमः ।
विद्याराज्ञ्यै महादेव्यै शिवायै सततं नमः ॥ ९॥

ऐं बालायै विद्महे क्लीं त्रिभुवनेश्वर्यै धीमहि ।
सौः तन्नो देवी प्रचोदयात् । ऐं बालायै स्वाहा ॥ १०॥

द्वादशान्तालयां श्रेष्ठां षोडशाधारगां शिवाम् ।
पञ्चेन्द्रियस्वरूपाख्यां भूयो भूयो नमाम्यहम् ॥ ११॥

ब्रह्मविद्यां ब्रह्मरूपां ब्रह्मज्ञानप्रदायिनीम् ।
वसुप्रदां वेदरूपां वन्दे बालां शुभाननाम् ॥ १२॥

अघोरां भीषणामाद्यामनन्तोपरिसंस्थिताम् ।
देवदेवेश्वरीं भद्रां श्रीबालां प्रणमाम्यहम् ॥ १३॥

भवप्रियां भवाधारां भगरूपां भगप्रियाम् ।
भयानकां भूतधात्रीं भूदेवपूजितां भजे ॥ १४॥

अकारादिक्षकारान्तां क्लीबाक्षरात्मिकां पराम् ।
वन्दे वन्दे महामायां भवभव्यभयापहाम् ॥ १५॥

नाडीरूप्यै नमस्तेऽस्तु धातुरूप्यै नमो नमः ।
जीवरूप्यै नमस्यामि ब्रह्मरूप्यै नमो नमः ॥ १६॥

नमस्ते मन्त्ररूपायै पीठगायै नमो नमः ।
सिंहासनेश्वरि तुभ्यं सिद्धिरूप्यै नमो नमः ॥ १७॥

नमस्ते मातृरूपिण्यै नमस्ते भैरवप्रिये ।
नमस्ते चोपपीठायै बालायै सततं नमः ॥ १८॥

योगेश्वर्यै नमस्तेऽस्तु योगदायै नमो नमः ।
योगनिद्रास्वरूपिण्यै बालादेव्यै नमो नमः ॥ १९॥

सुपुण्यायै नमस्तेऽस्तु सुशुद्धायै नमो नमः ।
सुगुह्यायै नमस्तेऽस्तु बालादेव्यै नमो नमः ॥ २०॥

इतीदं स्तवराजाख्यं सर्वस्तोत्रोत्तमोत्तमम् ।
ये पठन्ति महेशानि पुनर्जन्म न विद्यते ॥ २१॥

सर्वपापहरं पुण्यं सर्वस्फोटविनाशकम् ।
सर्वसिद्धिप्रदं श्रेष्ठं भोगैश्वर्यप्रदायकम् ॥ २२॥

इति श्रीबालास्तवराजः (३) सम्पूर्णः ।

Proofread by PSA Easwaran

*Shri Bala Stavaraja 3*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*